M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 298

Title: Darsha Purnakosa Prayoga

298

Incomplete

Darsha - Paurnamasa Prayog		Title
		Author
		Editor
		Year, Vols.
		Publisher
298	Begins abruptly	Remarks

ष्मंतोघृताच्यादेवांजिगातिसुम्नयों३प्रवोवाजाहविष्मंतोघृताच्यादेवांजिगातिसुम्नयों३म
ग्नआयाहिवीतयेगृणानोहव्यदातये।निहोतासत्सिबर्हिषों३तंत्वासमिद्भिरंगिरोघृतेनव
र्द्धयामसि।बृहच्छोचायविष्ठ्यों३सनःपृथुश्रवाय्यमछादेवविवाससि।बृहदग्नेसुवीर्यों३मी
ळेन्योनमस्यस्तिरस्तमांसिदर्शतः।समग्निरिध्यतेवृषों३वृषोअग्निःसमिध्यतेश्वोनदेव
वाहनः।तंहविष्मंतईळतें३वृषणंत्वावयंवृषन्वृषणःसमिधीमहि।अग्नेदीद्यतंबृहों३म
ग्निंदूतंवृणीमहेहोतारंविश्ववेदसं।अस्ययज्ञस्यसुक्रतों३समिध्यमानोअध्वरेग्निःपाव 298
कईड्यः।शोचिष्केशस्तमीमहों३समिद्धोअग्नआवहदेवान्यक्षिस्वध्वर।त्वंहिहव्यवाक
सो३माजुहोतादुवस्यताग्निंप्रयत्यध्वरेवृणीध्वंहव्यवाहनो३माजुहोतादुवस्यताग्निं
प्रयत्यध्वरे।वृणीध्वंहव्यवाहनो३माजुहोतादुवस्यताग्निंप्रयत्यध्वरेवृणीध्वंहव्यवाहनो३
मग्नेमहांअसिब्राह्मणभारत।यजमानस्यार्षेयान्प्रवृणीते।देवेद्धोमन्विद्धऋषिष्टुतो

विप्रानुमदितः कविशस्तो ब्रह्मसंशितो घृताहवनः प्रणीर्यज्ञानां रथीरध्वराणामतूर्तो होता तू
र्णिर्हव्यवाट्। अवसाय। आस्पात्रं जुहूर्देवानां चमसो देवपानो अरां इवाग्ने नेमिर्देवांस्त्वं परिभू
रस्यावह देवान्यजमानाय। अग्निमग्न आवह। पौर्णमास्यां दर्शे सोममावह। अग्निमावह
ह। विष्णुमुपांशु। आवह। अग्नीषोमावावह। इंद्रं वैमृधमावह। पौर्णमास्यां। दर्शे। इंद्रा
ग्नी आवह। देवां आज्यपां आवह। अग्निं होत्राय। वह स्वं महिमानमावह। आ
वह जातवेदः सुयजा यज। यथास्थितं। ऊर्ध्वजानुरुपविश्य पादाग्रे व्यूह्य लक्षणानि भूमौ प्रा
देशे कुर्यात्। अदितिर्मातास्यांतरिक्षान्माछेत्सीः। इदमहमग्निना देवेन देवलया त्रिवृतास्तो
मेन रथंतरेण साम्ना गायत्रेण छंदसाग्निष्टोमेन यज्ञेन वषट्कारेण वज्रेण योस्मान्द्वे
ष्टि यं च वयं द्विष्मस्तं हन्मि। आश्रावयिष्यंतमनुमंत्रयेत। आश्रावय यज्ञं देवेषु आश्रावय मां
मनुष्येषु कीर्त्यै यशसे ब्रह्मवर्चसाय। प्रवृणानं। देव सवितरेतं त्वा वृणते अग्निं होत्राय स २

ह पित्रा वैश्वानरेण। द्यावापृथिवी मां पातामग्निर्होता हं मानुषः। मानुष इत्यध्वर्यो श्रुत्वा। उदायु
षा स्वायुषोदोषधीनां रसेनोत्पर्जन्यस्य धामभिरुदस्थाममृतां अनु। उत्तिष्ठेत्। पृथिव्यां अध्व
र्येनिवर्तिश्च पाशा। अग्निं होतारमंतरा विज्ञत्वा। असिनंति पाकमति धीर एति। स्वधाय। ऋत
स्य पंथामन्वेमि होता। अभिक्रम्यासे ध्वर्युमन्वारभेत। पार्श्वस्थेन पाणिनाग्नी ध्रुमं कदेशेन
सव्येन च। इंद्रमन्वारभामहे होतृवूर्ये पुरोहितं। येनायन्नुत्तमं स्वर्देवा अंगिरसो दिवं। संमा
र्जने आरभ्यात्मं मुखं संमृजीत। संमार्गोसि सं मां प्रजया पशुभिर्मृड्ढि। सकृन्मंत्रेण द्वि
स्तूष्णीं। स्वपृष्ठाद्दक्षं। होतृषदनमभिमंत्रयेत। अहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद यो
स्मत्पाकतरः। अंगुष्ठोपकनिष्ठिकाभ्यां होतृषदनात्तृणं प्रत्यग्दक्षिणा निरसेत्। निरस्तः परा
वसुः। अपउपस्पृश्य। इदमहमर्वावसोः सदने सीदामीत्युपविशेत्। दक्षिणोत्तरेणोपस्थे
हि न। देव बर्हिः स्वासस्थं त्वाध्यासदेयं। अभिषिहोतः प्रतरां वर्हिषद्ध्व। जानु शिरसा बर्हिरुपस्पृ
श्यान ऊर्ध्वं जपेत। भूपतये नमो भुवनपतये नमो भूतानां पतये नमो भूवतये नमः। प्राणं प्र

होत्रप्रयोगः पद्येपानंप्रपद्येव्यानंप्रपद्येवाचंप्रपद्येचक्षुःप्रपद्येश्रोत्रंप्रपद्येमनःप्रपद्येआत्मानंप्रपद्येगायत्रीं
प्रपद्येत्रिष्टुभंप्रपद्येजगतींप्रपद्येनुष्टुभंप्रपद्येछंदांसिप्रपद्येसूर्योनोदिवस्पातुवातोअंतरि
क्षात।अग्निर्नःपार्थिवेभ्यः।नमोमहद्भ्योनमोअर्भकेभ्योनमोयुवभ्योनमआशिनेभ्यः।य
जामदेवान्यदिशक्नवाममाज्यायसःशंसमावृक्षिदेवाः।विश्वेदेवाःशास्तनमायथेहहो
तावृतोमनवैयन्निषद्य।प्रमेब्रूतभागधेयंयथावोयेनपथाहव्यमावोवहानि।अराधिहो
तानिषदायजीयानभिप्रयांसिसुधितानिहिख्यत।यजामहेयज्ञियान्हंतदेवांईळामहा
ईड्यांआज्येन।तदद्यवाचःप्रथमं।समाप्यप्रदीप्तइध्मेस्रुचावादापयन्निगदेन।अग्निर्हो
तावेत्वग्नेहोत्रंवेत्तुम।वित्रंसाधुतेयजमानदेवता।योअग्निं।अवसाय।होतारमवृथाःइति
जपेत्।घृतवतीमध्वर्योःस्रुचमास्यस्वदेवयुवंविश्ववारंईळामहैदेवांईळेन्यांनम
स्यामनमस्यांन्यजामयज्ञियान्।ये३यजामहेसमिधःसमिधोअग्नआज्यस्यव्य
न्तुवौ३षट्।वागोजःसहओजोमयिप्राणापानौ।वषट्कारमुत्क्रामन्नुमंत्रयते।ये३यजा २

महेतनूनपादग्नआज्यस्यवेतुवौ३षट्।वागोज०वासिष्ठानां।ये३यजामहेनराशंसोअग्नआ
ज्यस्यवेतुवौ३षट्।वागो०ये३यजामहइळोअग्नआज्यस्यव्यंतुवौ३षट्।वागो०ये३यजामहे
बर्हिरग्नआज्यस्यवेतुवौ३षट्।वागो०ये३यजामहेस्वाहाग्निंस्वाहासोमंस्वाहाग्निंस्वाहाविष्णुंस्वा
हाउपां०ग्नीषोमौस्वाहेंद्रंवैमृधंस्वाहा।स्वाहादेवाआज्यपाजुषाणाअग्नआज्यस्यव्यंतुवौ३षट्
वागो०दर्शे।ये३यजामहेस्वाहाग्निंस्वाहासोमंस्वाहाग्निंस्वाहाविष्णुंउपांशुस्वाहेंद्राग्नीस्वाहादे
वाआज्यपाजुषाणाअग्नआज्यस्यव्यंतुवौ३षट्।वागो०यात्रिघ्नोपौर्णमास्यां।अग्निर्वृत्राणि
जंघनद्द्रविणस्युर्विपन्यया।समिद्धःशुक्रआहुतः।३।ये३यजामहेग्निंजुषाणोअग्निराज्यस्यवेतु
वौ३षट्।वागो०त्वंसोमासिसत्पतिस्त्वंराजोतवृत्रहा।त्वंभद्रोअसिक्रतुः।३।ये३यजामहेसोमंजु
षाणःसोमआज्यस्यहविषोवेतुवौ३षट्।वागो०दर्शे।वृधन्वंतोअग्निःप्रत्नेनमन्मनाशुंभा
नस्तन्वंस्वां।कविर्विप्रेणवावृधे।३।ये३यजामहेग्निंजुषाणोअग्निराज्यस्यवेतुवौ३षट्।वागो०
सोमगीर्भिष्ट्वावयंवर्धयामोवचोविदः।सुमृळीकोनआविश।३।ये३यजामहेसोमंजुषाणःसो

मआज्यस्य हविषो वेतु वौ ३ षट्। वौगो। प्रधान। अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं। अ
पां रेतांसि जिन्वतो ३। ये ३ यजामहे ग्निं भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवा
भिः। दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहं वौ ३ षट्। वागो। इदं विष्णुर्विचक्रमे त्रे
धा नि दधे पदं। समूढमस्य पांसुरे इत्युपांशु। ॐ ३ इत्युच्चैः। ये ३ यजामह इत्युच्चैः। उपांशु विष्णुं त्रि
र्दिवः पृथिव्या एष एतां विचक्रमे शतर्चसं महित्वा। प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविर
स्य नाम वौ ३ षट्। उच्चैः। वागो। अग्नीषोमा सवेदसा सहूती वनतं गिरः। सं देवत्रा बभूवथुः। ये ३
यजामहे ग्नीषोमौ युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तं। युवं सिंधूंरभिशस्ते
रवद्यादग्नीषोमावमुंचतं गृभीतान्वौ ३ षट्। वागो। विनइंद्र मृधो जहि नीचा यच्छ पृतन्यतः। यो
अस्माँ अभिदासत्यधरं गमया तमो ३। ये ३ यजामह इंद्रं वैमृधं मृगो न भीमः कुचरो गिरिष्ठाः
परावत आ जगंथा परस्याः। सृकं संशाय पविमिंद्र तिग्मं वि शत्रून्ताढि वि मृधो नुदस्व वौ ३
षट्। इति पौर्णमास्यां। दर्शे। इंद्राग्नी अवसा गतमस्मभ्यं चर्षणीसहा। मा नो दुःशंस ईशत। ओ ३ ५

ये ३ यजामह इंद्राग्नी गीर्भिर्विप्रः प्रमतिमिच्छमानः ईट्टे रयिं यशसं पूर्वभाजं। इंद्राग्नी वृत्रहणा
सुवज्रा प्र णो नव्येभिस्तिरतं देष्णैः वौ ३ षट्। वागो। स्विष्टकृतः। पिप्रीहि देवाँ उशतो यविष्ठ वि
द्वाँ ऋतूँ ऋतुपते यजेह। ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठो ३। ये ३ यजामहे
ग्निं स्विष्टकृतमयाळग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाळग्नेः प्रिया धा
मान्ययाड्विष्णोः उपांशु प्रिया धामान्ययाळग्नीषोमयोः प्रिया धामान्ययाळिंद्रस्य वैमृध
स्य प्रिया धामान्ययाड्देवानामाज्यपानां प्रिया धामानि यक्षदग्नेर्होतुः प्रिया धामानि यक्ष
पौ। त्स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषतां हविरग्ने यदद्य विशो अ
ध्वरस्य होतः पावक शोचे वेष्ट्वं हि यज्वा। ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अ
द्य ३ वौ ३ षट्। वागो। दर्शे। ये ३ यजामहे ग्निं स्विष्टकृत० सोमस्य। अग्नेः प्रिया० विष्णोः० इं
द्राग्न्योः प्रिया० देवाना० यक्षदग्ने० सो अ० ऋता० द्या ३ वौ ३ षट्। वागो। प्रदेशान्यापर्वणी
६ उत्तमे अंजयित्वोद्गयोर्धारयाम्यात्मनि मां वाचस्पतिना तद्धुतस्य पेप्राणाय पाश्नामि। उत्तरमुत्त

रे। मन संस्वतिनानहुतस्योर्जैपानायप्राश्नामि। अथरमथरे। स्तृष्टोदकं। अंजलिनेकां प्रति
गृह्य सव्येपाणौ कृत्वा॥ पश्चादस्याउदगंगुलिंपाणिमुपधायांतरेळामनदापवीतांतरेणां
यं गुष्ठमंगुली श्वसंधितीपमाददीतप्रक्षाल्य व्याममंगुष्ठेनाभिसंगृह्यप्रस्वाहस्वांगुलीरमुष्टिं
कृत्वादक्षिणतइळांपरिगृह्यास्यसंमितामुपह्वयते प्राणसंमितांवा। उपांशु। इळोपहूतास
हदिवाबृहताद्विरोनोपास्मांइळाह्वयतांसहदिवाबृहताद्विरोनेळोपहूतासहांतरिक्षेणवामदे
व्येनवायुनोपास्मांइळाह्वयतांसहपृथिव्यारथंतरेणाग्निनोपहूतागावःसहाशिरउपमां
गावःसहाशिराह्वयंतामुपहूताधेनुःसहऋषभोपमांधेनुःसहऋषभाह्वयतामुपहूतागौर्घृ
तपद्युपमांगौर्घृतपदीह्वयतामुपहूतादिव्याःसप्तहोतारउपमांदिव्याःसप्तहोतारोह्वयंतामु
पहूतःसखाभक्षउपमांसखाभक्षोह्वयतामुपहूतेळावृष्टिरुपमामिळावृष्टिर्ह्वयतां। अथोच्चैः
। इळोपहूतोपहूतेळोपास्मांइळाह्वयतामिळोपहूता। मानवीघृतपदीमैत्रावरुणीब्रह्मदेवकृ ५

तमुपहूतंदैव्याअध्वर्यवउपहूताउपहूतामनुष्याः। यइमंयज्ञमवान्येचयज्ञपतिंवर्धानुपहू
तेद्यावापृथिवीपूर्वजेऋतावरीदेवीदेवपुत्रे। उपहूतोयंयजमानउत्तरस्यांदेवयज्यायामुपहूतो
भूयसिहविष्करणइदंमेदेवाहविर्जुषंतामितितस्मिन्नुपहूतः। इत्युपहूयाघांतरेळांप्राश्नीया
त्। इळेभागंजुषस्वनःपिन्वगाजिन्वार्वतोरायस्पोषस्येशिषे। तस्यनोरास्वतस्यनोदा
स्तस्यास्तेभागमशीमहहि। सर्वात्मानःसर्वतनवःसर्ववीराःसर्वपूरुषाःसर्वपुरुषाइति
वा। अथांतरेळांप्राश्याचम्याथापरिस्तरणेभ्यःकिंचित्धीयापआसेच्यमंतेतन्मार्जनं
चतुर्धाकरणंप्राश्य। कइदंकस्मा अदात्कामःकामायादात्कामोदाताकामःप्रतिग्र
हीताकामंसमुद्रमाविशकामेनत्वाप्रतिगृह्णामिकामैतत्तेवृष्टिरसिद्यौस्त्वाददातुपृ
थिवीप्रतिगृह्णातु। यथाभागंप्रतिगृह्णामि। अथानुयाजाः। देवंबर्हिर्वसुवनेवसुधेयस्य
वेतु३वौ३षट्। यागो०। देवोनराशंसोवसुवनेवसुधेयस्यवेतु३वौ३षट्। यागो०। देवो
अग्निःस्विष्टकृत्सुद्रविणामंद्रःकविःसत्यमन्मायजीहोताहोतुर्होतुरायजीयानग्नेयां

देशानयाड्ञां अपि प्रेर्यंति होत्रे अमत्सतातां ससनुषी होत्रां देवंगमां दिविदेवेषु यज्ञमेरये
मं स्विष्टकृच्चाग्ने होता भूत्सुर्वसुवने वसुधेयस्य नमोवाके विही उ वौ ३ षट्। वा गो०
अनवानंवा। अथ सूक्तवाकः। इदं द्यावापृथिवी भद्रमभूदार्ध्म सूक्तवाकमुत नमोवा
कमृध्यास्म सूक्तोच्यमग्ने त्वं सूक्तवागसि। उपश्रुती दिवस्पृथिव्योरोमन्वती तेऽस्मि
न्यज्ञे यजमान द्यावापृथिवी स्तां। शंगयी जीरदानू अत्रस्नू अप्रवेदे उरुगव्यूती अभ
यंकृतौ। वृष्टिद्यावा रीत्यापा शंभुवौ मयोभुवा ऊर्जस्वती पयस्वती सूपचरणा च स्वधि
चरणा च तयोराविदि। अग्निरिदं हविरजुषतावीवृधत महो ज्यायोऽकृत। सोम इदं
हविरजुषतावीवृधत महो ज्यायोऽकृत। अग्निरिदं हविरजुषतावीवृधत महो ज्यायोऽकृ
त। उ० विष्णुः उपांशु। इदं हविरजुषतावीवृधत महो ज्यायोऽकृत। अग्नीषोमाविदं हवि
रजुषेतामवीवृधेतां महो ज्यायोऽक्रातां। इंद्रो वैमृध इदं हविरजुषतावीवृधत महो ज्या
योऽकृत। वैमृध पक्षे। पौर्णमास्यां। अमावास्यायां। इंद्राग्नी इदं हविरजुषेताम ८

वीवृधेतां महो ज्यायोऽक्रातां। देवा आज्यपा आज्यमजुषंतावीवृधंत महो ज्यायोऽक्रत। अग्निर्होत्रेणेदं
हविरजुषतावीवृधत महो ज्यायोऽकृत। अस्यामृधेद्धोत्रायां देवंगमायामाशास्ते यजमानः। असु
कशर्मा मुकनक्षत्रः। आयुराशास्ते सुप्रजास्त्वमाशास्ते रायस्पोषमाशास्ते सजातवनस्यामा
शास्ते उत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशास्ते दिव्यं प्रियमाशास्ते। यदनेन हविषाशास्ते
तदश्यात्तदृध्यात्तदस्मै देवा रासंतां तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषाः इष्टं च वीतं चोभे
च नो द्यावापृथिवी अंहसस्पातामिह गतिर्वामस्येदं च नमो देवेभ्यः। शंयुवाकाय संप्रेषितः। तच्छंयो
रावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भे
षजं शं नो अस्तु द्विपदे शं चतुष्पदे। वेदमस्मै प्रकल्प्य पुरस्तात्फलीयात्। वेदोसि वेदा विदय उ
दायुषा स्वायुषा दोषधीनां रसेनोत्पर्जन्यस्य धामभिरुदस्थाममृतां अनु। उत्थाप आज्याहि
पत्न्यस्यापविद्रय। आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं। भवा वाजस्य संगथे। य उ यजामहे
सोमं संतर्पयामि स ममु यंतु वाजाः संवृष्ण्यान्यभिमातिषाहः। आप्यायमानो अमृताय सोम दि
वि श्रवांस्युत्तमानि धिष्व। उ वौ ३ षट्। वा गो० इदं त्वष्टारमग्रियं विश्वरूपमुपह्वये। अस्मा

मस्त्कु केवलो। इये३ यजामहे त्वष्टारं तन्नस्तुरीपमधपोषयित्नु देवत्वष्टर्विरराणंस्यस्व यतोवीरः
कर्मण्यः सुदक्षोयुक्तग्रावजायतेदेवकामा३ वौषट्। वागो० देवानांपत्नीरुशतीरवंतुनः प्रावंतुनःस्तु
जयेवाजसातये। याःपार्थिवासोया अपामपिव्रतेतानोदेवीः सुहवाः शर्म यछता ये३ यजामहे
देवानांपत्नीरुतग्नाव्यंतुदेवपत्नीरिंद्राण्यग्नाय्यश्विनीराट्। आरोदसीवरुणानीशृणोतुव्यं
तुदेवीर्यऋतुर्जनीनां३ वौ३षट्। वागो०। राकामहंसुहवांसुष्टुतीहुवेशृणोतुनः सुभगाबोधतु
त्मना। सीव्यत्वपः सूच्याछिद्यमानयाददातुवीरंशतदायमुक्थ्यम्। ये३ यजामहेराकांयास्ते
राकेसुमतयः सुपेशसोयाभिर्ददासिदाशुषेवसूनि। ताभिर्नोअद्यसुमनाउपागहिसहस्रपोषंसुभ
गेरराणा३ वौ३षट्। वागो०। सिनीवालिपृथुष्टुकेयादेवानामसिस्वसा। जुषस्वहव्यमाहु
तंप्रजांदेविदिदिड्ढिनःये३ यजामहेसिनीवालींयासुबाहुः स्वंगुरिः सुषूमाबहुसूवरीः
तस्यैविश्पत्न्यैहविः सिनीवाल्यैजुहोतना३ वौ३षट्। वागो०। कुहूमहंसुवृतंविद्मनापस
मस्मिन्यज्ञेसुहवांजोहवीमि। सानोददातुश्रवणंपितृणांतस्यैतेदेविहविषाविधेमा। ये३
यजामहेकुहूंकुहूर्देवानाममृतस्यपत्नीहव्यानोअस्यहविषःशृणोतु। संदाशुषेकिरतुभू

रिवामंरायस्पोषयजमानेदधात्व३ वौ३षट्। वागो०। अनुनोद्यानुमतिर्यज्ञंदेवेषुमन्यतां। अ
ग्निश्चहव्यवाहनोभवतंदाशुषेमयः। ये३ यजामहेनुमतिमन्विदनुमतेत्वंमन्यासैशंचनस्कृधि।
क्रत्वेदक्षायनोहिनु३। प्रणआयूंषितारिषा३ वौ३षट्। वागो०। अग्निर्होतागृहपतिःसराजा
विश्वावेदजनिमाजातवेदाः। देवानामुतयोमर्त्यानांयजिष्ठःसप्रयजतामृतावा। ये३ य
जामहेग्निंगृहपतिं। इयमाकग्निरजरः पितानोविभुर्विश्वानासुदृशीकोअस्मे। सुगार्हपत्याः
समिषोदिदीह्यस्मद्र्यक्संमिमीहिश्रवांसी३ वौ३षट्। वागो०। आज्यंप्राषितकेवरापयीते
कामुपह्वयसर्वप्राश्नीयात्। नमार्जनं। वेदंपत्न्यैप्रदद्यादयवाचयेद्धोताध्वर्युर्वा। वेदोसिवित्ति
रसिविदेयकर्मासिकरणमसिक्रियासंसनिरसिसनितासिसनेयंघृतवंतंकुला। यिनंरायस्पो
षंसहस्रिणंवेदोददातुवाजिनं। यंबहवउपजीवंतियोजनानामसद्वशी। तंविदेयप्रजांवि
देयकामायत्वा। वेदशिनसानाभिंदेशमालभेत। प्रत्वामुंचामिवरुणस्यपाशाद्येनत्वा
बध्नात्सविनासुशेवः। ऋतस्ययोनौसुकृतस्यलोकेरिष्टांत्वासहपत्यादधामि। पत्न्यै

योक्त्रं विमुंचति। तत्प्रत्यग्गार्हपत्याद्द्विगुणं प्राक्पाशं निधाय परिस्तीर्णोदस्योदगग्राणि वेदतृ
णानि करोति पुरस्तात्पूर्णपात्रं संश्लिष्टं वेदतृणेरभिमृश्य वाचयेत्। पूर्णमसि पूर्णं मे भूयाः
सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूया अक्षितिरसि मा मे क्षेष्ठाः
। प्राच्यां दिशि देवा ऋत्विजो मार्जयंतां। दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां। प्रतीच्यां
दिशि गृहाः पशवो मार्जयंतां। उदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयंतां। ऊर्ध्वायां
दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयतां। अथास्या उत्तानमंजलिं मध्यस्ताद्धोक्ष्य
निधायात्मनश्च सव्यं पूर्णपात्रं निनयन्वाचयेत्। माहं प्रजां परासिचं या नः सयावरी
स्थन। समुद्रे वो निनयामि स्वं पाथो अपीथ। वेदतृणान्यग्रे गृहीत्वा विधून्वन्संततं स्त
णन्स्त्वेन गार्हपत्यादाहवनीयमेति। तूष्णीं तन्तुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो
रक्ष धिया कृतान्। अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनं। शेषानि
धाय प्रत्यगुदगाहवनीयादवस्थाय स्थाल्याः स्रुवेणादाय सर्वप्रायश्चित्तानि जुहु

यात्। अयाश्चाग्ने॰ अतो देवा॰ इदं विष्णु॰ भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा।
भूर्भुवः स्वः स्वाहा। ओं च मे स्वरश्च मे यज्ञोप च ते नमश्च। यत्ते न्यूनं तस्मै त उप यत्ते
तिरिक्तं तस्मै ते नमः। संस्थाप्योपस्थाय तीर्थेन निष्क्रम्या नियमः। इति दर्श
पौर्णमासेष्टिप्रयोगः॥ श्रीरस्तु ॥ ॥ ॥ ॥ ॥ ॥